X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 32

Title 'SIVALINGA...ADI MURTI
PRATISTHA VIDHI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 32 Subject: Dharmaśāstra

Title: Śivaliṅgaviṣṇudurgāsūryagaṇeśādi Mūrti Pratiṣṭhā Vidhiḥ.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9·5" by 4·4" Extent: 8 foll. rest of [illegible] missing

Language: Sanskrit. Script: Devanāgarī

Remarks: incomplete, ends abruptly.

॥श्रीगणेशाय नमः॥ ॥बौधायनसूत्रैस्त्रैविक्रम्यादिपद्धतिसारोद्धारेणाचरशिवलिंगविष्णुदुर्गा
सूर्यगणेशादिमूर्तिप्रतिष्ठाविधिरुच्यते॥ अथ यजमानः पत्न्या सह पूर्वेद्युः कृतहविष्याशन
ब्रह्मचर्यादिप्रतिष्ठालग्नदिनात्पूर्वेद्युः प्रासादवास्तुप्रतिष्ठां विदध्यात्॥ यद्यप्यागमानु
सारात्त्रैविक्रम्यादौ वास्तुप्रतिष्ठादेवप्रतिष्ठयाऽभेदेकप्रयोगतयोक्ता तथापि बौधायनमा
र्गस्यादौ न देवप्रतिष्ठायाः स्वातंत्र्योक्तेः स्वतंत्रप्रयोगता वास्तुप्रयोगतायायुक्तेत्यभिसं
धायैव श्रीमन्नारायणसूरिणा स्वतंत्रैव प्रतिष्ठाऽपद्धतिः कृताऽल्पतया स्थंडिलम
ध्यक्तंकुंडोपसंहारपूर्वं शिवसिद्धांतशेखरएव प्रासादपीठब्रह्मशिलादेः पूर्वमुक्तेस्थि
रप्रतिष्ठामेव प्रक्रम्य कुंडानुकल्पतया स्थंडिलमध्यक्तंकुंडोपसंहारपूर्वकं॥ तस्मा
त्क्षणे संपुत्कं कुंडं कयाचिद्विचक्षणः॥ स्थंडिलं वापि कुर्वीत सुशुद्धैः सिकतैः सितैः॥ ह
स्तमात्रं प्रविस्तारं सुसमं चतुरंगुलोन्नतमिति॥ अतः कुंडमंडपाद्यसंभवे स्थंडिलपक्षा

श्रयणेनैकदिनाधिवासनपक्षेण च संक्षिप्तः प्रयोगः कथ्यते॥ तत्र यद्यपि कालादर्शहेमाद्रि तै
ग्रंथेषु दक्षिणायननिषेधो दृश्यते प्रतिप्रसवऐश्व विशेष्यविषयएव॥ यतीनां सर्वका
लेषु लिंगस्यारोपणं मतमिति॥ ग्रहणग्रंथियग्रहणाच्च तथामात्रभैरववाङ्नरसिंहत्रिविक्र व रा
माः॥ महिषासुर इत्यस्य स्थाप्यावेदक्षिणायन इति देवताविशेषणमेव ग्रहणात्॥ तथापि
शैवागमाचार्यविरचिते शैवसिद्धांतशेखरे॥ श्रेष्ठोत्तरे प्रतिष्ठास्यादयने मुक्तिमिच्छतां॥
दक्षिणेपि मुमुक्षूणां मलमासेन साध्ययोरिति मुक्तिकामस्य दक्षिणायनेपि भवति॥ अत्र
त्रैविक्रम्यादिपद्धतिरपि प्रमाणमित्युक्तं॥ ततो नित्यं निवर्त्य कृतमंगलस्नानः शुक्लांबर
माल्यादियुतो दर्भेष्वासीनो दर्भान्धारयमाणो देशकालादि संकीर्त्य करिष्यमाणशिवादि
प्रतिष्ठायां निर्विघ्नतासिध्यर्थं गणपतिपूजनकर्मादौ चांगतयोक्तं स्वस्तिवाचनं गण
पत्यादि षोडशमातृणां ब्राह्म्यादि सप्तमातृ णां च पूजनं च करिष्ये इति संकल्प्य मातृपू

ग्नंतंविधायाभ्युदयिकश्राद्धसंकल्पमेवंप येत्॥प्रतिष्ठायागनिमित्तंश्राद्धमेतत्सुदुर्ल
भं।यजमानात्मशक्त्यंतंकरिष्येमारपूर्वकंमिति॥ततोनांदीश्राद्धंकुर्यात्॥अथपुन
र्देशकालौसंकीर्त्यशिवसालोक्यादिकामोमोक्षकामोवानतदुक्तनानाफलकामोवा
गणपतिदुर्गाविष्ण्वादिप्रतिवारदेवतोपेतशिवलिंगादिप्रतिष्ठामहंकरिष्य इतिप्र
धानसंकल्पंविधायतत्रब्रह्मादिवरणमहंकरिष्य इतिसंकल्प्यास्मिन्कर्मण्यमु
कवेदाध्यायिनममुकगोत्रममुकशर्माणममुकवेदाध्यायि अमुकगोत्रोमुकशर्मा २
ऽहमनेनफलादिनाब्रह्माणंत्वांवृणे॥वृतोस्मीतिप्रतिवचनं॥एवमेवाचार्यंवृत्वा
प्रार्थयते॥मंत्रमूर्त्तिर्भवान्नाथसंसारोच्छेदकारकः॥देवःपूज्योयथास्यात्कुरुष्वमे
गतिंचनः॥संसारभयभीतेनचार्यर्भक्तितः॥प्रारब्धस्त्वत्प्रसादेननिर्विघ्नंमेभवत्वि
यज्ञःसु ति॥ततोप्येवंहोतारंवाऋत्विजःसदस्यंचवृत्वाब्रह्मादीन्मधुपर्कवस्त्रयज्ञोपवीतगंधमा

ल्पानेककारादिभिर्यथाविभवंपूजयेत्॥द्विगुणितंआचार्याय॥मंडपाभावेद्वारपालाभा
वात्नतत्कार्यंहोमकालीनेमंत्रजपेऋत्विजामेवमध्येकेचिन्नियोक्तव्याः॥ततःपूर्ववेद
घोषैःसहप्रतिष्ठास्थानंगच्छेयुः॥अथाचार्यःप्रासादस्थानेमंडपच्छायायांशुचिदेशेसर्व
तःप्रतिष्कृतेमध्येवेदिकांचतुरस्रांतदुत्तरतःस्नानशालांप्रकल्प्यवेदिकायाःपश्चिमे
स्थंडिलंशुचिस्सहाहस्तमात्रंचतुरस्रंचांगुलोन्नतंऋत्विक्सहितःकुर्यात्॥ततोयथा
विहितंकर्मकुर्विविरुध्यमितियजमानेनसंप्रेषितोआचार्यःप्राणानायम्यमंत्रवद्देव
मयोभूत्वातिथ्यादिसंकीर्त्यअमुककर्मणियजमानेनवृतोहमाचार्यकर्मकरिष्ये॥इति
संकल्प्य॥यागभूमिप्रासादंस्नानशालांचापोहिष्ठेतितिसृभिःशोदकेनाभ्युक्ष्ययदत्रसंस्थि
तंभूतंस्थानमाश्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥अपःक्रामंतुभूता
निपिशाचाःसर्वतोदिशं॥सर्वेषामविरोधेनब्रह्मकर्मसमारभे इतिचतुर्दिक्षुसितसर्षपा

न्स्कीर्य॥ देवाश्चार्यांतुयातुधाना अपयांतुविष्णोदेवयजनंरक्षस्वेतिरक्षोघ्नमित्यादिरा
क्षोघ्नेनचसूक्तेनरक्षांकृत्वाकुंडमंडपानावेपिद्वारचतुष्टयंपरिकल्प्यप्रतिद्वारंकलशंसो ध्यै
दकंसपंचपल्लवंप्रतिष्ठाप्यइंद्रादिदशदिक्पालानावाह्याभ्यर्च्यवेदिकायांशिवेलिंगतोभद्
विष्ण्वादिसर्वदेवतासुसर्वतोभद्रंवाविलिख्यमंडलदेवताःस्थापयेत्॥तत्रमध्येब्रह्माणं
इंद्राद्यष्टौलोकपालान्यथाक्रमंस्थाप्य॥ततः॥इंद्रेशानमध्येऽष्टौवसून्॥इंद्राग्निम ३
ध्येएकादशरुद्रान्॥अग्नियममध्येद्वादशादित्यान्॥यमनिऋतिमध्येऽश्विनौ॥निऋ
तिवरुणमध्येविश्वान्देवान्॥ वरुणवायुमध्येपितॄन्॥वायुसोममध्येनागान्॥सोमई
शानमध्येस्कंदंवृषंच॥पद्मस्येशानादिदलाष्टकेक्रमेणविष्णुदुर्गाधातारंमृत्युरोगान्
समुद्रान्सरितोमरुतोगणपतिं॥कर्णिकाधःपृथ्वी॥कर्णिकायांमेरुंतदुपरिस्थापनीयं
देवमिति॥मंडलबाह्येपूर्वादिक्रमेणवज्रशक्तिदंडखड्गपाशांकुशगदात्रिशूलानिदि

क्पालायुधानितद्वाहनानिच ऐरावतमेष॥महिष॥प्रेत॥मकर॥हरिण॥नरवृषभाना
वाहयेत्॥ततोयथावकाशंगौतम भरद्वाज विश्वामित्र कश्यप जमदग्नि वसिष्ठात्रीन्
सप्तर्षीन्॥आदित्यादिनवग्रहान्॥तद्वाह्येऐंद्रीकुमारीब्राह्मीवाराहीचामुंडावैष्ण
वीमाहेश्वरीवैनायकीचाष्टतः स्थापयेत्॥गंधादिनाप्रपूज्यमंडलंभक्ष्यभोज्यैःसमंता
त्प्रपूर्यदीपिकाभिरुद्योतयेत्॥ ॥इतिमंडलपूजा॥ ॥त्रैविक्रम्यामत्रवास्तुप्रतिष्ठोक्ता
॥तत्रक्रमविशेषोयेवत्॥चरुश्रपणंतंकृत्वानानाकुंडपक्षेस्वकुंडाग्निमेवकुंडसंख्य
याविभज्यत्विक्कुंडेषुस्थापनं॥ततःप्रासादस्यमध्येईशानकोणेवावेद्याईशानभागे
नैर्ऋतेवा॥एकस्तंचतुरस्रंचतुःषष्टिपदंवास्तुमंडलंविधाय॥लक्ष्मीयशोमतीकांता
सुप्रिया विमला शिवा॥सुभगासुमनाचेडा नमोंतैर्नामभिर्नव॥प्राग्रग्रायुदक्संस्थान
वरेषाश्चसूत्रैः शालिपिष्टेनवाकार्याः॥तथा ˆ॥विरजाविनवाविशोकाचनमोंतैर्नामभि

धन्याप्राणाविशालाह्रीसुभद्राचजयानिशा

नव॥ प्राक्संस्था उदगग्रा नव रेखा अक्षतैः॥ पिष्टेन वा कार्या॥ स्वर्णादिशलाकया वा प
टादावालिख्य॥ कोणे षट्सार्द्धपदाश्चतुर्विंशतिरेकपदाः॥ मध्ये चतुष्पदो ब्रह्मा॥ दिक्षु च
पंच त्वारः षट्पदाः॥ शेषाश्चाष्टौ द्विपदाः॥ एवं चत्वारिंशद्देवतापदानि॥ तद्बहिरष्टौ चरक्यादीनामि
ति॥ ततस्तस्यां वेद्यामीशानादिकोणेषु॥ चत्वारो लोहकीला निवेशनीया अनेन मंत्रेण प्रतिकी
लारोपणमावृत्तेन॥ विशंतु भूतले नागा लोकपालाश्च सर्वतः॥ प्रासादेऽत्रावतिष्ठंतु आयुर्ब ४
लकराः सदा॥ ततस्तत्र माषभक्तबलिदानमथानेन मंत्रेण कार्यं॥ अग्निभ्योऽप्यथ सर्पेभ्यो ये
चान्ये तत्समाश्रिताः॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं॥ ततः शिखिनं ब्रह्माणं चादि
कृत्वा क्रमेणावाह्य षोडशोपचारैर्मंत्रैः कुर्यात्॥ तत्र ब्रह्मादिपङ्क्तौ नृसिंहपरिचर्यायामुक्तः॥
शिख्यादिकेत्वैशानकोणपदोत्तरार्द्धे शिखिनं तद्दक्षिणार्द्धे पर्जन्यं तद्दक्षिणतः क्रमेण बा
ह्यपंक्तौ षट्स्वेकपदेषु जयंतमिंद्रं सूर्यं सत्यं भृशमंतरिक्षमिति षट्॥ आग्नेयकोणपदोत्त

रार्द्धदक्षिणार्द्धयोर्वायुं पूषणं च॥ तत्पश्चिमपंक्तौ षट्स्वेकपदेषु वितथं बृहत्क्षतं यमं गंध
र्वं भृंगराजं मृगमिति षट्॥ नैरृत्यकोणपदद्दक्षिणार्द्धोत्तरार्द्धयोः पितॄन्दौवारिकं च॥ तदु
त्तरे च पंक्तिगे पदे षट्के क्रमेण सुग्रीवं पुष्पदंतं वरुणं असुरं शोकं पापमिति षट्॥ वायव्यको
णपददक्षिणोत्तरार्द्धयोः रोगं अहिं च॥ तत्पूर्वे तत्पंक्तिगतेषु षट्स्वेकपदेषु मुख्यं भल्लाटं सो
मं सर्पं अदितिं दितिमिति षट्॥ पुनरंतरीशकोणगते द्वितीयपंक्तौ स्थ तत्पश्चिमपदद्वये आ
पं॥ तद्दक्षिणपदद्वये आपवत्सं॥ तद्दक्षिणपदचतुष्के अर्यमणं॥ तद्दक्षिणपदद्वये सवितारं
॥ तद्दक्षिणपदद्वये सावित्रं॥ तत्पश्चिमपदचतुष्के विवस्वंतं॥ तत्पश्चिमद्वये तद्विबुधा
धिपं॥ तदुत्तरे जयं॥ उत्तरपदचतुष्के मित्रं॥ उत्तरपदद्वये राजयक्ष्माणं॥ तदुत्तर
पदद्वये रुद्रं॥ तत्पूर्वपदचतुष्के पृथ्वीधरं॥ मध्ये पदचतुष्के ब्रह्माणं॥ तदुत्तरे वास्तो
ष्पत इति मंत्रेण कलशे वास्तुं॥ इति पंचचत्वारिंशद्देवता वास्तुमंडले॥ तद्बहिरैशा

नादिक्रमेण चरकीस्कंदं विदारीं अर्यमणं पूतनां जंभकं पापराक्षसीं पिलिपिछ्छिमित्य
ष्टावावाह्य सर्वाः षोडशोडशोपचारैः संपूज्य पायसेनाज्येन तदभावे कृशरापुष्पघृता
क्तैः सर्वेभ्यो बलिं दद्यात्॥ तत आचम्य वास्तोष्पत इति मंत्रेण चरुणाष्टोत्तरशतं जुहु
यात्॥ मधुसर्पिषाय वैः कृष्णतिलैः क्षीरवृक्षस्य समिद्भिर्घृतमधूक्ताभिः शतसंख्यम
ष्टाविंशतिसंख्यं वा प्रतिद्रव्यं कृत्वा वास्तोष्पत इति च तस्त्रिभिर्वास्तोष्पते ध्रुवा स्थूणेति पंच ५
बिल्वानि तद्बीजानि वा मंत्रपंचकेन जुहुयात्॥ अत्र प्रणवाद्यैः स्वाहांतैः शिख्यादिवास्तु
देवतानाममंत्रैर्यथाशक्ति तिलैः प्रतिदेवतमष्टसंख्यमपि कृत्वा वास्तुमर्मसंधायाघो
रेभ्योऽघोरेभ्यो इत्यनेनाज्येनाष्टोत्तरशतं कृत्वा राक्षोघ्नपावमानसूक्तं पठन्॥ दुग्धज
लधारेण क्रमेण पातयन् त्रिसूत्र्या प्रदक्षिणं प्रासादं वेष्टयेत्॥ तत्पीठे पूजितां हेमीं वा
स्तुप्रतिमां दधिदूर्वासिद्धधान्यशैवालानां धानाक्षतपुष्पयुते पक्वमृद्भांडे संस्थाप्य तल्लि

धाय चतुःषष्टिधा भाजित प्रासादाग्नेयकोणे कोणपदादुत्तरे आकाशपदे जानुमात्रं गर्भं कृ
त्वा॥ जलेनापूर्य गंधपुष्पाणि प्रक्षिप्य मृद्भांडं तत्र निधाय गर्तं तथैव मृदापूरयेत्॥ मृदाधि
क्यं शुभं॥ ॥इति वास्तुपूजा॥ अत्र ग्रहशांतिरपि त्रैविक्रम्यामुक्तान्यत्र नोक्ता॥ अथ य
जमानेन सत्कृतो विज्ञैश्चाचार्यः स्नानशालां गत्वा शिल्पिगृहात्तत्रानीतं देवं प्रक्षालितं स
परिकरं प्रार्थयेत्॥ स्वागतं देवदेवेश विश्वरूप नमोस्तु ते॥ शुद्धेपि त्वदधिष्ठाने शुद्धिं कुर्मः
सहस्त्वतां॥ ततो लिंगमर्चां वा मधुरेण घृतेनाभ्यज्य यवपिष्टेनोद्वर्त्योष्णोदकेन स्नपयित्वा
तत उत्तरे पीठं तं रेवस्त्राद्यं सुगंधेनालिप्य दीपेन दीप्य धूपेन धूपयित्वा पुष्पैः संपूज्य नवो
न वाससा संवेष्टयित्वा परमान्नेन सपरिकराय बलिं दद्यात्॥ ततो देवं द्वादशाभिर्मृद्भिर
ष्टपलाभिरुदकेन च स्नापयेत्॥ ततो गायत्र्या द्वादशपलगोमूत्रेण॥ गंधद्वारामिति सप्त
पलगोमयेन॥ आप्यायस्वेति षोडशपलपयसा॥ दधिक्राव्ण इति विंशतिपलं दध्ना॥ घृत

मिश्रहूनिसप्तपलघृतेन॥ अंनरांतराचांतेचजलेन॥ ततःपंचामृतेन॥ तत्रदुग्धदधिघृतानांप्रमाणं
पूर्वोक्तं॥ मधुवातेतित्रिपलमधुना॥ आर्यंगोरितित्रिपलशर्करयांतरांतराचजलेन मानस्तोकेइति
सुष्टीमितिनस्मनोदकेनच॥ प्रागादिकलशचतुष्केउदकं॥ प्रथमेगजाश्वारण्यवराहेश्ववानवल्मी
कसंगमहृदराजद्वाराग्निहोत्रस्थानानांमृद॥ द्वितीयेश्वत्थोदुंबरप्लक्षचूतन्यग्रोधाख्यपंचपल्ल
वकषायात॥ तृतीयेयवगोधूमशालीतिलकंगुश्यामाकाख्यसप्तधान्यानि॥ चतुर्थेगंधपुष्पफला ६
निचक्षिप्त्वा॥ आपोहिष्ठेतियोवःशिवनः तस्माअरंग आकलशेष्वितिचतसृभिःक्रमेण॥ निषि
च्य॥ समुद्रज्येष्ठेतिऋक्चतुष्टयेनयुगपत्कलशचतुष्टयोदकेनाभिषिंच्यतीर्थोदककलशंसंस्थाप्य
नत्वतीर्थान्यावाह्येत्सर्वदैवा॥ तद्यथा॥ काशीकुरुक्षेत्रीमायाऽवंतियोध्या~~कारस्थली~~मथोपु
री॥ शालिग्रामंसगोकर्णंनर्मदाचसरस्वती॥ तीर्थान्येतानिकुंभेस्मिन्विशंतुब्रह्मशासनात॥
ऋषारूढासरोजाक्षीपद्महस्ताशशिप्रभा॥ आगच्छतुसरिच्छ्रेष्ठागंगापापप्रणाशिनी॥ नीलोत्पल

नीदलश्यामापद्महस्तांबुजेक्षणा॥ आयांतुयमुनादेवीकूर्मयानस्थितासदा॥ प्राचीसरस्वतीपु
ण्यापयोष्णीगौतमीतथा॥ चर्मिलाचंद्रभागाचसरयूर्गंडकीतथा॥ जंबुकाचशतद्रुश्चकालिका
सुप्रभातथा॥ वितस्ताचविपाशाचनर्मदाचपुनःपुना॥ गोदावरीमोऽवर्त्तशर्करावर्तमार्जनी॥
कावेरीकौशिकीचैवतृतीयाचमहानदी॥ विटंकाप्रतिकूलाचसोमनंदाचविश्रुता॥ करतोयावेत्र
वतीरेणुकावेणुकाचया॥ आत्रेयाख्यावैतरणीकाश्मीरीह्लादिनीतथा॥ प्लाविनीचशववस्तासा
कल्माषाशंकरीतथा॥ वसिष्ठाचअपाऽख्याचसिंधुवात्यारुणीतथा॥ ताम्रपर्णीत्रिसंध्याचत
थामंदाकिनीपरा॥ तैलकाशीविपाराचडुंडुनीनकुलीतथा॥ नीलगंधाचबोधाचपूर्णचंद्राशशि
प्रभा॥ अमरेशंप्रभासंचनैमिषंपुष्करंतथा॥ आषाढिडिंडिमारन्नंभारभूतिवलाकुलं॥ हरिचं
द्रंपरंगुह्यंगुह्यंमध्यमकेश्वरं॥ श्रीपर्वतंमहापुण्यंजलेश्वरमतःपरं॥ आम्रातकेश्वरंचैवमहा
कालंमहेश्वरं॥ केदारमुत्तमंगुह्यंमहाभैरवमेवच॥ गयांचैवकुरुक्षेत्रंगुह्यंकनखलंतथा॥ विमलं

रुद्रहासंचमाहेंद्रंभीममष्टमं॥ वस्त्रापदंरुद्रकोटीमविमुक्तंमहालयं॥ गोकर्णंभद्रकर्णंच
माहेशंस्थानमष्टमं॥ छागलाकद्विरंडंचकर्कोटंमंडलेश्वरं॥ कलंजरवनंचैवदेवदारु
वनंतथा॥ शंकुकर्णंतथैवेहस्थलेश्वरमतःपरं॥ एतान्यष्टौतीर्थानिगुह्यक्षेत्राणिसर्व
शः॥ तानिसर्वाणिकुंभेस्मिन्विशंतुब्रह्मशासनात्॥ ततोनेनकुंभेनस्नपयित्वाउत्तर ७
तःपीठांतरेनिवेश्य॥ अभितोवस्त्रयुग्मेनाचार्यंदेवींचाभिवेष्ट्यगंधाक्षतधूपदीपाष्टकमला
नैवेद्यैःसंपूज्यसौवर्णेताम्रमयेवापात्रेमधूघृतेनिधायमधुवाताघृतंमितिरुद्रत्तिनेत्र
निमंत्र्यताभ्यांअक्ताथयासुवर्णशलाकयाचित्रंदेवानामित्यर्द्धर्चेनप्रतिनेत्रमावृत्तेनने
त्रोन्मीलनंकुर्यात्॥ स्वयंपार्श्वेस्थित्वासतूर्यघोषं॥ तदानकश्चित्पुरतस्तिष्ठेत्॥ अथा
दर्शनस्यनोन्यानिदर्शयेत्॥ सुवर्णस्त्वद्याजरूपंलिंगाकारं ॐनमोभगवतेरुद्रायहि

रण्यरेतसेपरायपरमात्मनेविश्वरूपायउमाप्रियायनमइतिमंत्रेणसंस्थि
रत्न्ययथाशास्त्रंशिल्पिभिःस्फुटंकारयित्वाततोमध्वंजनंकार्यं॥ नबाणरत्नादि
लिंगेष्वितिविशेषः॥ ततोदेवंविश्वतश्चक्षुरितिसकलीकृत्यावाहयेत्॥ एह्येहिभग
वन्रुद्रंनोलोकानुग्रहकारक॥ यज्ञभागंगृहाणेमंमहादेवनमोस्तुते॥ ततोपा ४
द्याद्याचमनीयविलेपनोपवीतवस्त्रोत्तरीयधूपदीपनैवेद्याचमनीयानित्र्यंबक
मितिदद्यात्॥ तेषांप्रतिपत्तिःशिल्पिनेदानं॥ अत्रेदेवस्यसौम्यदृष्टिसिध्यर्थमाचा
र्यायधेनुमूर्तिगादिभ्यश्चयथाशक्तिहिरण्यंदद्यात्॥ ततोदेवंपुरुषसूक्तेनस्तुत्वा॥
उत्तिष्ठब्रह्मणस्पतइतिउत्थाप्यरथमारोप्यकनिक्रदंदितिसूक्तंपठन्कनिक्रदंदि
सतूर्यघोषंमंडपप्रादक्षिणेनयागमंडपस्यपश्चिमेनोत्तरेणद्वारेणआरुह्यनेनिप्र

तृतीये चंदनयवचूर्णेनकपिलाज्ययुतेन॥ चतुर्थे मनःशिलाप्रियंगुचूर्णेनकपिलाज्ययुतेन॥ पं
चमे रूप्यतिलचूर्णेनकपिलाज्ययुतेन॥ षष्ठे रक्तचंदनपद्मकेसरचूर्णेनकपिलाज्ययुतेन॥ सप्तमे गोरोच
वेश्य वेद्यां पश्चिमतः पीठे प्राङ्मुखायमधुपर्कं कुर्यात्॥ अथ वेद्यां कुशप्रस्तरे निहि
तायां शय्यायां कशिपुं शुभ्रवस्त्रेणाछाद्य॥ उपधानद्वयं निधाय तस्याः पूर्वादिदिक्षु
विष्णुमधुसूदनत्रिविक्रमवामन॥ आग्नेयादिकोणेषु श्रीधरहृषीकेश पद्मनाभ
दामोदर स्वनामभिरावाह्य पूजयेत्॥ अथ शैवे॥ अन्यत्र वा शर्वमुमापतिं चोग्रं
रुद्रं भवं महेश्वरं॥ महादेवं च भीमं च क्रमात्तान्परितोन्यसेत्॥ ततो नमः शंभवे ८
ति मंत्रेण देवं प्राक्शिरसं शय्यायां शापयित्वा॥ तच्छिरप्रदेशे नूत्नवस्त्रवेष्टितं सपल्लवं
निद्राकलशं प्राजापत्यो यं मुहूर्तोस्त्विति यवपुंजोपरि प्रणवेन प्रतिष्ठाप्य संमंता
द्भक्ष्यभोज्यफलादर्शादिन्यवस्थाप्याप्यायस्वेति मधुसर्पिर्भ्यां देवमभ्यज्य
या ते रुद्रेति तिलसर्षपपिष्टेनोद्वर्त्य प्रथमे स्नाने मधुकुंकुमेनकपिलाज्ययु
तेन॥ द्वितीये स्नाने हरिद्रासिद्धार्थचूर्णेनकपिलाज्ययुतेन॥ यं तृतीये ताविलोमस्त्र
ननागकेसरचूर्णेनकपिलाज्ययुतेन॥ एतान्यनुलेपनानि एकदिनाधिवासनेपीदानीं कर्मान्ते॥ प्रतिमा